# ॥ पञ्चमोऽध्यायः ॥

ध्यानम्
ॐ घण्टा शूल हलानि शङ्ख मुसले चक्रं धनुः सायकं
हस्ताब्जै र्दधतीं घनान्त विलसच्छीतांशु तुल्य प्रभाम् ।
गौरीदेह समुद्भवां त्रिजगतां आधारभूतां महा-
पूर्वामत्र सरस्वतीं अनुभजे शुम्भादि दैत्यार्दिनीम् ॥

ॐ क्लीं ऋषिरुवाच ॥ १॥

पुरा शुम्भ निशुम्भाभ्यां असुराभ्यां शचीपतेः ।
त्रैलोक्यं यज्ञभागाश्च हृता मद बलाश्रयात् ॥ २॥

तावेव सूर्यतां तद्वत् अधिकारं तथैन्दवम् ।
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३॥

तावेव पवनर्द्धिं च चक्रतु र्वह्नि कर्म च ।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ४॥

हृताधिकारा स्त्रिदशास् ताभ्यां सर्वे निराकृताः ।
महासुराभ्यां तां देवीं संस्मरन्त्य पराजिताम् ॥ ५॥

तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ।
भवतां नाशयिष्यामि तत्क्षणा त्परमापदः ॥ ६॥

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ।
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ७॥

देवा ऊचुः ॥ ८॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ९॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दु रूपिण्यै सुखायै सततं नमः ॥ १०॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ११॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १२॥

अतिसौम्याति रौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ १३॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १४-१६॥

या देवी सर्वभूतेषु चेतने त्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७-१९॥

या देवी सर्वभूतेषु बुद्धि रूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २०-२२॥

या देवी सर्वभूतेषु निद्रा रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३-२५॥

या देवी सर्वभूतेषु क्षुधा रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६-२८॥

या देवी सर्वभूतेषुच् छाया रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २९-३१॥

या देवी सर्वभूतेषु शक्ति रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३२-३४॥

या देवी सर्वभूतेषु तृष्णा रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३५-३७॥

या देवी सर्वभूतेषु क्षान्ति रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३८-४०॥

या देवी सर्वभूतेषु जाति रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ४१-४३॥

या देवी सर्वभूतेषु लज्जा रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ४४-४६॥

या देवी सर्वभूतेषु शान्ति रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ४७-४९॥

या देवी सर्वभूतेषु श्रद्धा रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ५०-५२॥

या देवी सर्वभूतेषु कान्ति रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ५३-५५॥

या देवी सर्वभूतेषु लक्ष्मी रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ५६-५८॥

या देवी सर्वभूतेषु वृत्ति रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ५९-६१॥

या देवी सर्वभूतेषु स्मृति रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६२-६४॥

या देवी सर्वभूतेषु दया रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६५-६७॥

या देवी सर्वभूतेषु तुष्टि रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६८-७०॥

या देवी सर्वभूतेषु मातृ रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७१-७३॥

या देवी सर्वभूतेषु भ्रान्ति रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७४-७६॥

इन्द्रियाणा मधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्ति देव्यै नमो नमः ॥ ७७॥

चितिरूपेण या कृत्स्नं एतद् व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७८-८०॥

स्तुता सुरैः पूर्व मभीष्ट संश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभ हेतुरीश्वरी
शुभानि भद्राण्यपि हन्तु चापदः ॥ ८१॥

या साम्प्रतं चोद्धत दैत्यतापितैः
अस्माभि रीशा च सुरै र्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्ति विनम्र मूर्तिभिः ॥ ८२॥

ऋषिरुवाच ॥ ८३॥
एवं स्तवादि युक्तानां देवानां तत्र पार्वती ।
स्नातु मभ्याययौ तोये जाह्नव्या नृपनन्दन ॥ ८४॥

साब्रवीत्तान् सुरान् सुभ्रू र्भवद्भिः स्तूयतेऽत्र का ।
शरीर कोशतश्चास्याः समुद्भूता ब्रवीच्छिवा ॥ ८५॥

स्तोत्रं ममैतत्क्रियते शुम्भदैत्य निराकृतैः ।
देवैः समेतैः समरे निशुम्भेन पराजितैः ॥ ८६॥

शरीर कोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ।
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ ८७॥

तस्यां विनिर्गतायां तु कृष्णा भूत्सापि पार्वती ।
कालिकेति समाख्याता हिमाचल कृताश्रया ॥ ८८॥

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ।
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भ निशुम्भयोः ॥ ८९॥

ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा ।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥ ९०॥

नैव तादृक् क्वचिद्रूपं दृष्टं केनचि दुत्तमम् ।
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥ ९१॥

स्त्रीरत्नमति चार्वङ्गी द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टु मर्हति ॥ ९२॥

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ।
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥ ९३॥

ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।

पारिजात तरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४॥

विमानं हंस संयुक्तं एतत्तिष्ठति तेऽङ्गणे ।
रत्नभूत मिहानीतं यदासी द्वेधसोऽद्भुतम् ॥ ९५॥

निधिरेष महापद्मः समानीतो धनेश्वरात् ।
किञ्जल्किनीं ददौ चाब्धिर् माला मम्लान पङ्कजाम् ॥ ९६॥

छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ।
तथायं स्यन्दनवरो यः पुरासीत्प्रजापतेः ॥ ९७॥

मृत्यो रुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।
पाशः सलिल राजस्य भ्रातुस्तव परिग्रहे ॥ ९८॥

निशुम्भस्याब्धि जाताश्च समस्ता रत्नजातयः ।
वह्निरपि ददौ तुभ्यं अग्नि शौचे च वाससी ॥ ९९॥

एवं दैत्येन्द्र रत्नानि समस्तान्या हृतानि ते ।
स्त्रीरत्न मेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ १००॥

ऋषिरुवाच ॥ १०१॥
निशम्येति वचः शुम्भः स तदा चण्ड मुण्डयोः ।
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥ १०२॥

इति चेति च वक्तव्या सा गत्वा वचनान्मम ।
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु ॥ १०३॥

स तत्र गत्वा यत्रास्ते शैलोद्देशे ऽतिशोभने ।
सा देवीं तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ १०४॥

दूत उवाच ॥ १०५॥
देवि दैत्येश्वरः शुम्भस् त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाश मिहागतः ॥ १०६॥

अव्याहताज्ञः सर्वासु यः सदा देव योनिषु ।
निर्जिताखिल दैत्यारिः स यदाह शृणुष्व तत् ॥ १०७॥

मम त्रैलोक्य मखिलं मम देवा वशानुगाः ।
यज्ञभागा नहं सर्वान् उपाश्नामि पृथक् पृथक् ॥ १०८॥

त्रैलोक्ये वर रत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नं च हृत्वा देवेन्द्र वाहनम् ॥ १०९॥

क्षीरोद मथनोद्भूतं अश्वरत्नं ममामरैः ।
उच्चैः श्रवस संज्ञं तत् प्रणिपत्य समर्पितम् ॥ ११०॥

यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ १११॥

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।
सा त्वमस्मानु पागच्छ यतो रत्नभुजो वयम् ॥ ११२॥

मां वा ममानुजं वापि निशुम्भ मुरु विक्रमम् ।
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥ ११३॥

परमैश्वर्य मतुलं प्राप्स्यसे मत्परिग्रहात् ।
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ११४॥

ऋषिरुवाच ॥ ११५॥
इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥ ११६॥

देव्युवाच ॥ ११७॥
सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम् ।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥ ११८॥

किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ।
श्रूयता मल्प बुद्धित्वात् प्रतिज्ञा या कृता पुरा ॥ ११९॥

यो मां जयति सङ्ग्रामे यो मे दर्पं व्यपोहति ।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥ १२०॥

तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ।
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ १२१॥

दूत उवाच ॥ १२२॥
अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ।
त्रैलोक्ये कः पुमांस्तिष्ठेत् अग्रे शुम्भ निशुम्भयोः ॥ १२३॥

अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।
तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका ॥ १२४॥

इन्द्राद्याः सकला देवास् तस्थुर्येषां न संयुगे ।
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम् ॥ १२५॥

सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भ निशुम्भयोः ।
केशाकर्षण निर्धूत गौरवा मा गमिष्यसि ॥ १२६॥

देव्युवाच ॥ १२७॥
एवमेतद् बली शुम्भो निशुम्भश्चाति वीर्यवान् ।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ १२८॥

स त्वं गच्छ मयोक्तं ते यदेतत्सर्व मादृतः ।
तदाचक्ष्वा सुरेन्द्राय स च युक्तं करोतु तत् ॥ १२९॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्या दूत संवादो नाम पञ्चमोऽध्यायः ॥ ५॥